तावम् २, } तावम् २, } तुतूषम् २, } तोतूयम् २ ; }
तुत्वा २, } तावयित्वा २, } तुतूषित्वा २, } तोतूयित्वा २. }

(731) "तुज हिंसायाम्" (I-भ्वादिः-244. सक. सेट्. पर.)

'हिंसायां शपि तुञ्जतीत्यनिदितः तस्यां तुजेः तोजति ॥' (श्लो. 66) इति देवः। तोजकः-जिका, तोजकः-जिका, तुतोजिषकः-तुतुजिषकः-षिका, तोतुजकः-जिका ; तुजिता-त्री, तोजयिता-त्री, तुतोजिषिता-तुतुजिषिता-त्री, तोतुजिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककुचधातुवत् (200) बोध्यानि। [A]तुजितम्।

(732) "तुजि पालने" (I-भ्वादिः-245. सक. सेट्. पर.)

'—अभिहिते त्वर्थे पदं तुञ्जयेत्।' (श्लो. 66) इति देवः।

तुञ्जकः-ञ्जिका, तुञ्जकः-ञ्जिका, तुतुञ्जिषकः-षिका, तोतुञ्जकः-ञ्जिका ; तुञ्जिता-त्री, तुञ्जयिता-त्री, तुतुञ्जिषिता-त्री, तोतुञ्जिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि कुठिधातुवत् (209) बोध्यानि। क्विपि—तुन्-तुन्जौ-तुन्जः इति रूपाणि। पचाद्यचि तुञ्जः। घञि तुङ्गः, न्यङ्क्वादित्वात् कुत्वम्।

(733) "तुजि हिंसाबलादाननिकेतनेषु"
(X-चुरादिः-1566. सक. सेट्. उभ.)

'—अभिहिते त्वर्थे पदं तुञ्जयेत्।' (श्लो. 66) इति देवः।

अभिहितोऽर्थः=भाषणरूपः इति पुरुषकारः। केचिदमुं धातुं तुज इति पठन्ति।

तुञ्जकः-ञ्जिका, तुतुञ्जयिषकः-षिका, तुञ्जकः-ञ्जिका, तुतुञ्जिषकः-षिका, तोतुञ्जकः-ञ्जिका ; तुञ्जयिता-त्री, तुतुञ्जयिषिता-त्री, तुञ्जिता-त्री, तुतुञ्जिषिता-त्री, तोतुञ्जिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचितिधातुवत् (523) ज्ञेयानि। अस्य धातोः इदित्त्वात् णिचो वैकल्पिकत्वं बोध्यम्। घञि—[B]तुञ्जः।

A. 'जहर्ष जज्ञातुजितस्थलैरसौ वृषैरतुञ्जैर्गजगञ्जिभिर्वृतम्।' धा. का. 1. 33.

B. 'आश्वाठितारिकुलतुञ्जविपिञ्जशीलः संपेञ्यन् गृहमसान्त्वयदेष गोपीः।' धा. का. 3. 17.